सात्त्विकी राजसी चैव तामसी चेति विश्रुता ॥
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः ।
माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम् ॥
पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्तथा ।
देवीसूक्तजपश्चैव यज्ञो वह्निषु तर्पणम् ॥
राजसी बलिदानैश्च नैवेद्यैः सामिषैस्तथा ।
सुरामांसाद्युपाहारैर्जपयज्ञैर्विना तु या ॥
विना मन्त्रैस्तामसी स्यात् किरातानान्तु सम्मता ।
ब्राह्मणैः क्षत्त्रियैर्वैश्यैः शूद्रैरन्यैश्च सेवकैः ॥
एवं नानाम्लेच्छगणैः पूज्यते सर्व्वदस्युभिः ।
स्वयं वाप्यन्यतो वापि पूजयेत् पूजयेत वा ॥
अर्च्चकस्य तपोयोगादर्च्चनस्यातिशायनात् ।
आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति ॥'

अथ नवम्यादिकल्पः ।

'इषे मास्यसिते पक्षे कन्याराशिगते रवौ ।
नवम्यां बोधयेद्देवीं क्रीडाकौतुकमङ्गलैः ॥
ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणम् ।
सप्तम्यां मूलयुक्तायां पत्त्रिकायाः प्रवेशनम् ॥
पूर्व्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणम् ।
उत्तरेण नवम्यान्तु बलिभिः पूजयेच्छिवाम् ॥
श्रवणेन दशम्यान्तु प्रणिपत्य विसर्जयेत् ॥'
प्रतिवर्षं कन्यार्के कर्त्तव्यत्वानुपपत्तेः सिंहार्केऽपि बोधनं तुलार्केऽपि स्थापनादिकं क्रियते चान्द्र-ग्राह्यत्वात् कन्यार्के मलमासे न तदारभ्यते यदि पूर्व्वमारब्धं तदा मलमासेऽपि पूजादेवीमाहात्म्यपाठादिकं प्रत्यहं कर्त्तव्यमेव ।
'यावद्भूर्वायुराकाशं जलं वह्निशशिग्रहाः ।
तावच्च चण्डिकापूजा भविष्यति सदा भुवि ॥'
तत्र कृष्णनवम्यां देवल्यत्वेन पूर्व्वाह्णे बोधनम् । उभयदिने पूर्व्वाह्णे नवमीलाभे पूर्व्वदिने आर्द्रानुरोधे तु पूर्व्वाह्णं विना दिवामात्रे युग्मादरं विनापि परदिने बोधनं उभयदिने पूर्व्वाह्णे नवम्यार्द्रालाभे पूर्व्वदिने बोधनं युग्मात् ।
'कन्यादिमीनपर्य्यन्तं यत्र संप्राप्यते शिवः ।
तत्र बोधः प्रकर्त्तव्यो देव्या राज्ञां शुभप्रदः ॥'
बोधनमन्त्रो यथा,—
'इषे मास्यसिते पक्षे नवम्यामार्द्रयोगतः ।
श्रीवृक्षे बोधयामि त्वां यावत् पूजां करोम्यहम् ॥
ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥
अहमप्याश्विने तद्वद्बोधयामि सुरेश्वरीम् ।
शक्रेणापि च सम्बोध्य प्राप्तं राज्यं सुरालये ॥
तस्मादहं त्वां प्रतिबोधयामि
विभूतिराज्यप्रतिपत्तिहेतोः ॥
यथैव रामेण हतो दशास्य-
स्तथैव शत्रून् विनिपातयामि ॥
षष्ठीबोधने तु अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयाम्यत इति पठनीयम् ॥ * ॥

अथ प्रतिपदादिकल्पः ।

'आश्विने शुक्लपक्षे तु कर्त्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥'
प्रतिपदादितत्तत्तिथिषु कृत्यमाह भविष्ये ।
'केशसंस्कारद्रव्याणि प्रदद्यात् प्रतिपद्दिने ।
पट्टडोरं द्वितीयायां केशसंयमहेतवे ।
दर्पणञ्च तृतीयायां सिन्दूरालक्तकं तथा ॥
मधुपर्कं चतुर्थ्यान्तु तिलकं नेत्रमण्डनम् ।
पञ्चम्यामङ्गरागञ्च शक्त्यालङ्करणानि च ॥
षष्ठ्यां बिल्वतरौ बोधं सायं सन्ध्यासु कारयेत् ।
सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् ॥
उपोषणमथाष्टम्यामष्टशक्तेः प्रपूजनम् ।
नवम्यामुग्रचण्डायास्तद्वद्देवार्च्चनं दिवा ॥
पूजा च बलिदानञ्च तद्वन्मातॄः प्रपूजयेत्
कुमारी पूजनीया च भूषणीया च भूषणैः ॥
संपूज्य प्रेषणं कुर्य्यात् दशम्यां शावरोत्सवैः ।
अनेन विधिना यस्तु देवीं प्रीणयते नरः ॥
स्कन्दवत् पालयेत्तन्तु देवी सर्व्वापदि स्थितम् ।
पुत्त्रदारधनर्द्धीनां संख्या तस्य न विद्यते ।
भुक्त्वेह परमान् भोगान् प्रेत्य देवीगणो भवेत् ॥'

अथ षष्ठ्यादिकल्पः ।

'बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च ।
सप्तम्यां बिल्वशाखान्तामाहृत्य प्रतिपूजयेत् ॥
पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरञ्च स्वयं कुर्य्यात् बलिदानं महानिशि ॥
प्रभूतबलिदानञ्च नवम्यां विधिवच्चरेत् ।
ध्यायेद्दशभुजां देवीं दुर्गामन्त्रेण पूजयेत् ॥
विसर्जनं दशम्यान्तु कुर्य्याद्वै शावरोत्सवैः ।
धूलिकर्द्दमविक्षेपैः क्रीडाकौतुकमङ्गलैः ॥
भगलिङ्गाभिधानैश्च भगलिङ्गप्रगीतकैः ।
भगलिङ्गाद्यभिधाभिश्च कुर्य्याच्च दशमीदिने ॥' * ॥
नवमीबोधनासामर्थ्ये षष्ठ्यां सायं बोधनं यथा,
'षष्ठ्यां बिल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ॥'
षष्ठ्यां बोधनामन्त्रणकरणेऽपि पत्त्रीप्रवेशपूर्व्वदिने सायं षष्ठीलाभे एकादेवोभयकरणं यदा तु पूर्व्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठीलाभस्तदा पूर्व्वेद्युर्बोधनं परदिने सायमामन्त्रणम् । यदा तूभयदिने सायं षष्ठीलाभस्तदा परेऽह्नि षष्ठ्यां बोधनम् । उभयदिने सायं षष्ठ्यभावे पूर्व्वाह्णेऽपि षष्ठ्यां बोधनम् । आमन्त्रणमन्त्रस्तु ।
'मेरुमन्दरकैलासहिमवच्छिखरे गिरौ ।
जातः श्रीफलवृक्ष त्वमम्बिकायाः सदा प्रियः ॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ।
नेतव्योऽसि मया गच्छ पूज्यो दुर्गास्वरूपतः ॥
सायं षष्ठ्यान्तु कर्त्तव्यं पार्व्वत्या अधिवासनम् ।
षष्ठ्यभावेऽपि कर्त्तव्यं सप्तम्यामपि नारद ! ॥' * ॥

अथ सप्तम्यादिकल्पः ।

'आश्विने शुक्लपक्षे तु सप्तम्यादिदिनत्रये ।
तत्र पूजा विशेषेण कर्त्तव्या मम मानवैः ॥
विशेषं तत्र वक्ष्यामि शृणु पुत्त्रक ! मन्मतम् ।
सप्तम्यां पत्त्रिकापूजा रम्भादिनवभिर्युता ॥
महीमयी च मूर्त्तिर्मे पुत्त्रायुर्धनवृद्धये ।
अष्टमी सा महापुण्या तिथिः प्रीतिकरी मम ॥
कुर्य्यात्तत्र महास्नानं पञ्चगव्ययुतैस्तथा ।
गायत्त्रीभिः कषायैश्च गन्धाद्यैश्चोपचारिभिः ॥
ओषधीभिश्च सर्व्वाभिर्भृङ्गारैः कलसैस्तथा
पुष्परत्नादितोयैश्च गन्धैर्मलयजैस्तथा ॥
गीतवादित्रनादैश्च स्नापयेन्मां च भक्तितः ।
पूजा षडुपचारैश्च नैवेद्यैश्च मनोहरैः ॥
बिल्वपत्त्रैर्घृताक्तैश्च तिलधान्यादिसंयुतैः ।
जुहुयाज्ज्वलिते वह्नौ तस्य पुण्यफलं शृणु ॥
संसारे यानि सौख्यानि काम्यानि नरपुङ्गव ! ।
दीर्घमायुर्यशः पुत्त्रं विपुलं धनधान्यकम् ॥
लभते मत्प्रसादेन अन्ते मम पुरं व्रजेत् ।
बलिस्तत्र विशेषेण देयो मत्प्रीतये नरैः ॥
अनेन विधिना यस्तु नवमीमतिवाहयेत् ।
भुङ्क्ते च विपुलान् भोगानन्ते शिवपुरं व्रजेत् ॥
ततः सप्तम्यां मूलयुक्तायां केवलायां वा पूर्व्वाह्णे पत्त्रीप्रवेशः उभयत्र पूर्व्वाह्णे सप्तमीलाभे परत्र
'युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥'
पूर्व्वाह्णे नवपत्त्रिका शुभकरी सर्व्वार्थसिद्धिप्रदा
आरोग्यं धनदा करोति विजयं पत्त्रीप्रवेशे शुभा ।
मध्याह्ने जनपीडनक्षयकरी संग्रामघोरावहा
सायाह्ने वधबन्धनानि कलहं सर्पक्षतं सर्व्वदा ॥
सप्तम्यामस्तगायां यदि विशति गृहं पत्त्रिका श्रीफलाढ्या
राज्ञः सप्ताङ्गराज्यं जनसुखमखिलं हन्ति मूलानुरोधात् ।
तस्मात् सूर्य्योदयस्थां नरपतिशुभदां सप्तमीं प्राप्य देवीं
भूपालो वेशयेत्तां सकलजनहितां राघवर्द्धिं विधाय ॥
लिङ्गस्थां पूजयेद्देवीं मण्डलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पावके प्रतिमासु च ।
चित्रे च विशिखे खड्गे जलस्थाञ्चापि पूजयेत् ॥'
स्नात्वा यथाविधि विधौतकराननाङ्घ्रिराचम्य सम्यगमलाम्बरयुग्मधरः प्रागाननो धनददिग्वदनोऽथवापि बद्धासनो गणपतिञ्च गुरुञ्च नत्वा ।
'कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः ॥
पूजां समारभेद्देव्या नक्षत्रे वासरेऽपि वा ।
पशुघातश्च कर्त्तव्यो गवलाजवधस्तथा ॥'
उक्तवचने पशुघातश्च कर्त्तव्य इति स्मृतेः ।
'अष्टम्यां रुधिरैर्मांसैः कुसुमैश्च सुगन्धिभिः ।
पूजयेद्बहुजातीयैर्बलिभिर्भोजनैः शिवाम् ॥'
इति कालिकापुराणाच्च ॥
'अष्टम्यां बलिदानेन पुत्त्रनाशो भवेद्ध्रुवम् ।'
इति देवीपुराणीयं सन्धिपूजाबलिदानपरम् ॥
तत्पूजाया उभयतिथिकर्त्तव्यत्वेन तद्दिनस्य नवम्यां बाधकाभावात् । तत्पूजाविधानन्तु कालिकापुराणे वचनान्तरम् ।
'अष्टमीनवमीसन्धौ तृतीया खलु कथ्यते ।
तत्र पूज्या त्वहं पुत्त्र ! योगिनीगणसंयुता ॥
उपवासं महाष्टम्यां पुत्त्रवान्न समाचरेत् ।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत् ॥